# S S L C Model Examination 2022

## SANSKRIT ( SET 1 )

TIME 1:30 hrs SCORE :40

**निर्देशाः** -

1. 20 निमेषाः समाश्वाससमयः । प्रश्नान् पठितुम् इच्छानुसारं चयितुम्, उत्तराणि क्रमीकर्तुं च अयं समयः उपयोक्तव्यः ।
2. प्रश्नस्य निर्देशान् सश्रद्धं पठित्वा अवगत्य च उत्तराणि लेखनीयानि ।
3. प्रश्नानाम् अङ्काः तत्र तत्र दत्ताः । उत्तरलेखनाय समयः अङ्काः च परिगणनीयाः ।
4. 1 - 24 प्रश्नेभ्यः परमतः 40 अङ्काः कल्पिताः ।

**I . प्रश्नानां प्रत्येकम् एकैकः अङ्कः ।**

**भागः 1. ( 1 - 6 ) चतुर्णां समुचितम् उत्तरं कोष्ठकात् चित्वा लिखत । ( 4X1=4)**

**1.** वृक्षायुर्वेदस्य कर्ता कः?

( चरकः , सुरपालः. वराहमिहिरः )

**2 .** लाभानाम् श्रेष्ठम् किम् ?

( श्रुतम्, आरोग्यम्, तुष्टिः)

**3.** सुराधिपः कः ?

( व्यासः, नागेन्द्रः, देवेन्द्रः)

**4.** सह शब्दयोगे का विभक्तिः ?

( द्वितीया, तृतीया, पञ्चमी)

**5.** सर्वदर्शनानां सारसंग्रहभूता का ?

( रामायणम् , भगवद्गीता , चरकसंहिता )

**6.** कति कलाः सन्ति ?

( चतुष्षष्टिः , चत्वारिंशत् , चतुरशीतिः )

**भागः 2. ( 7- 9 ) प्रश्नानां प्रत्येकं एकैकः अङ्कः ।** **( 3X1=3)**

7. प्रोफ. पि. सि. देवस्या महाभागेन विरचितं महाकाव्यम् किम् ?

( केरलोदयम्, विशाखविजयम्, क्रिस्तुभागवतम् )

8. पञ्चमहाकाव्येषु अन्यतमम् किम् ?

( रामायणम्, किरातार्जुनीयम्, मेघदूतम्)

9. अभिज्ञानशाकुन्तले कति अङ्काः सन्ति ?

( पञ्च , सप्त , नव )

**II . प्रश्नानां प्रत्येकं द्वौ अङ्कौ ।** **( 1X2=2)**

**भागः 1.**

**10. उदाहरणानुसारं यदा - तदा उपयुज्य वाक्यं परिवर्तयत ।**

उदा - जलोपप्लवः आयाति ।

जनाः कष्टम् अनुभवन्ति ।

**यदा** जलोपप्लवः आयाति **तदा** जनाः कष्टम् अनुभवन्ति ।

सः कारागारे बद्धः आसीत् ।

संस्कारसम्बन्धीनीः नूतनकृतीः संरचयत् ।

**भागः 2. ( 11- 12) प्रश्नानां प्रत्येकं द्वौ अङ्कौ ।एकस्य उत्तरं लिखत ।( 1X2=2)**

**11. सूचनानुसारं गद्यक्रमं लिखतु ।**

न मुमोच लोचनजलानि
दयितजयमङ्गलैषिणी ।
यातमवनिमवसन्नभुजा-
न्न गलद्विवेद वलयं विलासिनी ।।

दयितजयमङ्गलैषिणी. . . . . . . . . . . . . लोचनजलानि. . . . . . . . । अवसन्नभुजात्
. . . . . . . वलयं अवनिं यातं. . . . . . . . . ।

**12. दक्षिणहस्तेन कृतं भिक्षादानं वामहस्तः मा जानन्तु इत्याशययुक्तं श्लोकं चित्वा लिखतु ।**

i. ददाति भिक्षां तु भवान् यदा तदा
न कारयेत्तूर्यनिनादमग्रतः ।
नृणां विलोकं स्तवनं च लिप्सवः
सभासु रथ्यासु च दाम्भिकाः यथा ।।

ii. भिक्षा त्वया दक्षिणहस्तदत्ता
मा ज्ञायतां वामकरेण ते सा ।
दानस्य चैवं निभृतं कृतस्य
पिता फलं दास्यति गुप्तदर्शी ।।

**III. ( 13- 16) प्रश्नानां प्रत्येकं त्रयः अङ्काः । त्रयाणाम् उत्तरं लिखत । ( 3X3=9)**

**भागः 1.**

**13. i. उदाहरणानुसारं पदच्छेदं लिखत ।**

तेनैव - तेन+ एव ।( एवं चेत्)
अनेनैव -

**ii. उदाहरणानुसारं विग्रहं लिखत ।**

राष्ट्रपिता - राष्ट्रस्य पिता । ( एवं चेत्)
राष्ट्रपतिः -

**iii. अधोदत्तवाक्यात् सम्बोधनापदं चित्वा लिखत ।**

" भो वासव ! पुत्रस्य दैन्यं दृष्ट्वा अहं रोदिमि"

**14.** त्रयाणां औषधसस्यानां नामानि तेषां औषधगुणानि च लिखत ।

**15. उदाहरणानुसारं पट्टिकां पूरयत ।**

| लट् | लङ् | लोट् |
|---|---|---|
| क्रीडति | ............... | क्रीडतु |
| ............. | अपृच्छत् | ................. |
| लिखति | ....................... | लिखतु |

**16. अधोदत्तेषु शतृशानजन्तरूपाणि विविच्य लिखत ।**

| |
|---|
| **नुद्यमानः , रुदन् , पचमानः ,ताडयन् ,पचन्, वन्दमानः** |

**भागः 2. प्रश्नानां प्रत्येकं त्रयः अङ्काः ।** **(1X3=3)**

**17. अधोदत्तवाक्यात् क्त्वान्त- तुमुन्नन्त- ल्यबन्तरूपाणि विविच्य लिखत ।**

कलोत्सवं द्रष्टुं समागताः वैदेशिकाः तत्र गत्वा कूटियाट्टं वीक्ष्य सन्तुष्टाः अभवन् ।

**IV . ( 18- 20) प्रश्नानां प्रत्येकं चत्वारः अङ्काः ।प्रश्नेभ्यः द्वयोः उत्तरं लिखत ।**

**भागः 1.** **( 2X4=8)**

**18. श्लोकं पठित्वा प्रश्नानां उत्तराणि लिखत ।**

स हि जातु गुरोः कुले वसन्
सवयोभिः सह भैक्ष्यलिप्सया ।
भगवान् भवनं द्विजन्मनो
धनहीनस्य विवेश कस्यचित् ।।

i. कस्य भवनं विवेश ?

ii. कीदृशस्य द्विजन्मन: भवनं विवेश ?

iii. गृहम् इत्यर्थकं पदं श्लोकात् चित्वा लिखत ।

iv. अस्मिन् श्लोके क्रियापदं किम् ?

**19. सूचनानुसारं जीवनचरितं लिखत ।**

**सूचना -**

| | | |
|---|---|---|
| नाम | - | कुमारनाशान् |
| जननम् | - | १८७३ एप्रिल् १२ कायिक्करा |
| प्रवृत्तिमण्डलः | - | कविः, सामाजिकः, तत्वज्ञानि । |
| कृतयः | - | नलिनी, चिन्ताविष्टयाय सीता, करुणा, प्ररोदनम् । |
| मरणम् | - | १९२४ जनुवरि १६ पल्लना, नौकादुरन्तम् । |

**20. यथोचितम् पट्टिकां पूरयत**

| कृतीनां नाम | विभागः | कर्ता |
|---|---|---|
| .......................... | महाकाव्यं | माधवविद्यारण्यस्वामी |
| महाभारतम् | . . . . . . . . . . . . | व्यासः |
| सत्यशोधनम् | आत्मकथा | .......................... |
| ................................ | आयुर्वेदः | चरकः |

**भागः 2. ( 21- 22) प्रश्नानां प्रत्येकं चत्वारः अङ्काः ।प्रश्नेभ्यः एकस्य उत्तरं लिखत ।** **( 1X4=4)**

**21. पञ्चमहाकाव्यान्यधिकृत्य सूचनानुसारं टिप्पणीं लिखत ।**

**सूचना -**

( आमुखम् - काव्यभेदः- प्रसिद्धाः भारतीयाः संस्कृतकवयः - पञ्चमहाकाव्यानि - तेषां कर्तारः - उपसंहारः)

## 22 . खण्डिकां पठित्वा प्रश्नानां उत्तराणि लिखत ।

वाजश्रवसः सर्वस्वदक्षिणं विश्वजिन्नाम यागं चकार ।यागान्ते ऋत्विग्भ्यः दक्षिणारूपेण धेनूः प्रददौ ।ताः सर्वाः अपि अशक्तरोमन्थाः समाप्तदोहाः प्रजननशक्तिरहिताश्चासन् ।एवं कृते पितरि तस्य पुत्रः नचिकेताः सर्वं तत् ससूक्ष्मम् अपश्यत्। ततः पितरमुपेत्य नचिकेताः पप्रच्छ - ' मां कस्मै ददाति ?'' इति।पुत्रस्य वचनं शृण्वन् पिता किमपि न प्रत्यवदत् ।

i. कः यागं चकार ?

ii. धेनूः कीदृशाः आसन् ?

iii. नचिकेताः किं पप्रच्छ ?

iv. खण्डिकांत् एकं ल्यबम्तमव्ययपदं चिव्वा लिखत ?

## V. ( 23- 24) प्रश्नानां प्रत्येकं पञ्च अङ्काः।प्रश्नेभ्यः एकस्य उत्तरं लिखत

(1X5=5)

## 23. प्रादेशिकभाषायां विवर्तयत ।

विजयनगरवासिनः श्रीमाधवविद्यारण्यस्वामिनः महाकाव्यं भवति शङ्करदिग्विजयम् । षोडशसर्गात्मकेऽस्मिन् काव्ये श्रीशङ्कराचार्यस्य सम्पूर्णं चरितं वर्णितमस्ति । शिवगुरोः आर्याम्बायाः च पुत्रः श्रीशङ्करः केरलेषु पूर्णानदीसमीपे कालटिग्रामे अजायत । अद्वैतवेदान्तप्रचारकोऽयं तदर्थं भारतस्य चतसृषु दिक्षु चत्वारि मठानि स्थापितवान् ।भारते सर्वत्र पर्यटन् अनेकान् पण्डितान् वादे विजित्य सः काश्मीरेषु सर्वज्ञपीठम् आरुरोह ।

**24.** क्रिस्तोः चरितमवलम्ब्य संस्कृतभाषया विरचितं प्रथमं केरलीयं महाकाव्यं भवति क्रिस्तुभागवतम्। महाकाव्यलक्षणे यदुक्तं तद् क्रिस्तुभागवतस्य विषयेऽपि अन्वर्थं भवति।अत्र कथा न केवलं भारतीये इतिहासे अपितु विश्वे सर्वत्र आद्रियमाणे इतिहासे अन्तर्भवति ।अन्यानि महाकाव्यलक्षणानि सर्वाणि क्रिस्तुभागवतेऽपि घटन्ते ।अत एव क्रिस्तुभागवतं तत्कर्तारं प्रोफ. पी. सी. देवस्यामहाशयं च सर्वकाराः बहुभिः पुरस्कारैः बह्वमन्यन्त ।